# Sukanāsopadeśa

SEM – II (HONS)

Ramsaday College
Mitu Ghosh



① शुकनासः कः आसीत् ? स कस्मै उपदेशं दत्तवान् ?

→ शुकनासः उज्जयिन्याः महाराजस्य तारापीडस्य प्राज्ञः मन्त्री आसीत्।
स चन्द्रापीडाय उपदेशं दत्तवान्।

② "महतीयं खल्वनर्थपरम्परा" – इत्यत्र का अनर्थपरम्परा भवन्ति ?

→ गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वञ्चेति एताः चतस्रः अनर्थपरम्पराः भवन्ति।

③ अपरिणामोपशमो दारुणलक्ष्मीमदः – कः केन प्रसङ्गेन कं प्रति एवम् उक्तवान् ?

→ महामन्त्री शुकनासः धनसम्पत्तिजनितमत्तता विषये चन्द्रापीडं प्रति एवम् उक्तवान्।

अघटनघटनपटीयसी राजलक्ष्मी नृपेषु सम्पद्जनितां मत्ततां विसृज्य नृपान् विभ्रान्तान् करोति, धनमदगर्विता राजानः गुरुजनान् अवज्ञां कुर्वन्ति। किन्तु नृपेषु सृष्टा सम्पद्जनिता मत्तता गुरूपदेशं विना अन्यत् केनापि उपायेन प्रशमिता भवति।

④ कष्टमनञ्जनवर्तिसाध्यपरमैश्वर्यतिमिरान्धत्वम् – कः कं प्रति एवम् उक्तवान् ? तात्पर्यञ्च किम् ?

→ महामन्त्री शुकनासः राजकुमारं चन्द्रापीडं प्रति एवम् उक्तवान्।

यौवनागमे यूनां सम्पद्तृष्णा प्रबला भवति, तिमिररोगग्रस्ताः जनाः सर्वं अन्धकारमयं पश्यन्ति, धनमदगर्वेण युवानः सर्वं जगत् भोग्यरूपेण विवेचन्ति। तिमिररोगजनितम् अन्धत्वम् अञ्जनप्रलेपेन प्रशम्यते, किन्तु धनमदगर्वजनितम्

Scanned by CamScanner

अन्धत्वं न केनापि उपायेन प्रशमनं प्राप्यते।

(5) विरला हि तेषामुपदेष्टार - इत्यत्र के कथं विरला: भवन्ति?

⇒ इत्यत्र नृपाणां सदुपदेशदातार: विरला भवन्ति।

अहङ्कारपूर्णा: राजान: गुरुजनानाम् उपदेशं न शृण्वन्ति, ते तान् प्रति सम्मानम् अपि न प्रदर्शयन्ति, तेन आत्ममर्यादासम्पन्ना: गुरुजना: अपि नृपान् उपदेष्टुं न इच्छन्ति। अत: ते सदुपदेशदातार: विरला: भवन्ति।

(6) अकारणञ्च भवति दुष्प्रकृतेरन्वय: श्रुतं वाविनयस्य - कश्च वक्ता? स: कं प्रति एवमुक्तवान्?

⇒ महामन्त्री शुकनास: अत्र वक्ता।
स: राजकुमारं चन्द्रापीडं प्रति एवमुक्तवान्।

(7) सततमूलमन्त्रशम्यो विषमो विषयविषास्वादमोह: - क: कं कथं वा एवमुक्तवान्?

⇒ महामन्त्री शुकनास: राजकुमारं चन्द्रापीडं प्रति एवमुक्तवान्।

युवान: राजकुमारा: विषयभोगेन मोहग्रस्ता: भवन्ति। विषयभोग: विषस्वरूप:, राजान: विषस्वरूपे विषयभोगे आच्छन्ना: सन्त: मूलमन्त्ररूपेण विषयभोगं जपन्ति, न केनापि औषधेन मन्त्रेण वापि नृपाणां विषयभोगेच्छा निवृत्ता भवति।



(8) लक्ष्मी: कथम् "अमृतसहोदरा" इति कथ्यते?

⇒ समुद्रमन्थनकाले क्षीरसमुद्रात् लक्ष्मी: अमृत: च एकीभूय उत्थितवत्यौ, वस्तुत: लक्ष्मी: अमृत: च समुद्रगर्भे एकत्र तिष्ठत:। अत: सा अमृतस्य सहोदरा जायते, तस्मात् सा अमृत-सहोदरा इति कथ्यते।

MILTU GHOSH

Scanned by CamScanner